# मातुः क्रन्दनम्

शुभङ्करदासः

उत्तरदिनाजपुरस्य रायगञ्जमहाविद्यालयस्य छात्रः अमरः। सः अतीव मेधावी, परन्तु दरिद्रः। अमरस्य पिता परलोकं गतः, गृहे केवलं माता, एका अनुजा च अस्ति। अमरः कांश्चन छात्रान् पाठयित्वा स्वपठनस्य रूप्यकाणि अर्जयति। अद्य तस्य स्नातकपरीक्षायाः फलप्रकाशो भविष्यति। राजीवेन दुरवाण्या सूचितं यत् अमरः पूर्ववत्सरवत् अस्मिन् वत्सरेऽपि प्रथमस्थानम् अलंकृतवान्। तथापि अमरः दुःखीव दृश्यते। तस्य मनस्कामः उद्योगलाभः, तेनैव तस्य परिवारस्य दरिद्रता अपाकर्तुं शक्या। तस्मात् सः उद्योगार्थं बह्वीः परीक्षाः अददात्। गतमासेऽपि उद्योगार्थं परीक्षामेकाम् अदात्। ईश्वरकृपया अद्यैव अपराह्णे अमरस्य नाम्ना पत्रमेकम् आगतं यत्र लिखितमस्ति तमुद्योगं सः प्राप्तवान्, कोलकाताशाखायां तस्य कार्यभारः। तस्मात् आगामिनि सप्ताहे एव तत्र गन्तव्यम्। परस्मिन् दिने अमरः रेलयानं गृहीतुं रेलस्थानकं गन्तुं प्रारभते। मार्गे दृष्टवान् क्षतविक्षतमेकं युवकम्। अमरेण सः युवकः चिकित्सालयम् आनीयत। अमरेण घटीं दृष्ट्वा परिलक्षितं यत् इदानीं तु रेलयानं न लभ्यते। तस्मात् चिन्तितं यत् स परश्वः गमिष्यति। चिकित्सकेन सूचितं यत् एषः पादेनैकेन खञ्जः प्राप्ताघातश्च जातः अतस्तस्य विश्रामः आवश्यकः। चिकित्सकः सूचितवान् यदेषः 'माता क्रन्दन्ती, तां रक्ष रक्ष' इति ब्रूवन्नस्ति। अमरः युवकस्यास्य विश्रामाय तं स्वगृहम् आनीतवान्।

परस्मिन् दिने प्रातः अमरेण 'का तव माता, सा क्वाऽस्ति, तस्याः किं जातम्' इत्यादिके पृष्टे सः युवकोऽवदत् भारतभूमिरियं तस्य माता। अस्माकं समाजस्य अवस्थामिमां दृष्ट्वा तेनोक्तं 'माता क्रन्दन्ती' इति। ब्रिटिश्जनानां पाशाद् मुक्तापि सा इदानीं जर्जरितैव। अत्रत्याः जनाः परस्परं युद्धविवादेन भारतं कलङ्कयन्ति, स्वसंस्कृतिं विस्मृत्य पाश्चात्यसंस्कृतिं गृह्णन्ति। किञ्च समाजस्य स्तम्भभूतान् युवकान् केचन राजनेतारः हस्तपाञ्चालिकावत् व्यवहरन्ति। शिक्षालयेऽपि साम्प्रतं प्रथमस्थानप्राप्तये प्रतियोगिता एव चलति न तु शिक्षादानम्। देशमातुरुन्नतये कोऽपि न चिन्तयति, केवलं स्वस्य स्वपरिवारस्यैव चिन्ता तेषां मनसि। ते किं विस्मृतवन्तः वयं सर्वे एकपरिवारस्थाः एव। ते किं त्यक्तवन्तः 'वसुधैव कुटुम्बकम्' इति श्रुतिम्। अधुना कालचक्रस्य एवं परिवर्तनं जातं यत् स्वभ्रातृष्वपि प्रेम नास्ति। एतस्य कारणं सङ्घबद्धाभावः, तदेवोच्यते-'संगच्छध्वं संवदध्वम्' इति। तस्मात् सः युवकः एकं संगठनं निर्मितवान्, यत्र सर्वे सम्मिलन्तः देशहिताय कार्यं कुर्वन्ति स्म। युवकाः ग्रामं ग्रामं गत्वा शिक्षाप्रचारं कुर्वन्तः जीवनं यापयन्ति स्म। परन्तु जाल्मराजनेतारः तत् सोढुम् असमर्थाः सन्तः तत्संगठननाशाय पाशमकल्पयन्। एकस्यां सन्ध्यायां यदा सर्वे सङ्घस्य प्रकोष्ठे कार्यरताः आसन् तदा प्रकोष्ठेऽग्निसंयोगः कृतः। केनचित् प्रकारेण एष युवकः ततः पलायनं कृतवान्। तत्रत्याः सर्वे देशप्रेमिकाः युवकाः वीरगतिं प्राप्तवन्तः। एतच्छ्रुत्वा अमरस्य खेदः जातः, स्वपरिवारं प्राप्तोद्योगं विस्मृत्यैव देशमातुः रक्षणाय तं युवकं जगाद 'तव अवशिष्टकार्यमिदमधुना अहं साधयिष्यामि'।तदर्थं प्रतिज्ञामपि कृतवान् अमरः। अमरः तं युवकमुक्तवान् 'निर्दिशतु किं करणीयं देशमातुः रक्षणाय' इति। अमरः तस्य युवकस्य निर्देशेन कार्यं करोति यथा रणाङ्गने अर्जुनः कृष्णस्य आज्ञां पालयति तथा। एवमेव अमरः तत्सङ्घं पुनरुज्जीवितमकरोत्। तस्य युवकस्य निर्देशेन संगठनं चालयति स्म। अस्माकं समाजस्य प्रधानव्याधिं निरक्षरतां प्रकृतशिक्षया दूरीकरोति। सा च शिक्षा न केवलं शास्त्रगताऽपि तु चरित्रगठनशिक्षा, या दिक्षु विस्तीर्यते। सङ्घबद्धाः युवकाः धनं दत्वा समाजसंस्कारकार्यं कुर्वन्ति, यथा स्वास्थ्यकेन्द्रनिर्माणं, शिक्षायतननिर्माणम् इत्यादि। एवं प्रकारेण अयं सङ्घः समाजे विख्यातो जातः। सर्वे युवकाः आगत्य

तत्र योगदानं कुर्वन्ति स्म। अमरः तत्कार्यभारं सम्प्रति निर्वहति।

एकदा प्रातःकाले सः तं युवकं कुत्राऽपि न प्राप्तवान्। बहु अन्वेषणात् परं तस्य उत्पीठिकायां पत्रमेकं प्राप्तम्। तत्र लिखितस्ति– 'भवता सम्यक् कार्यं कृतं, समाजसेवायै स्वजीवनम् देशस्य कृतेऽर्पितम्। अहं भवतः मनसि देशप्रेमजागरणाय अत्र आगत आसम्। भारतवर्षस्य बहूनि स्थानानि सन्ति यत्र सङ्गठनस्य आवश्यकता अस्ति, तस्मात् इतः गतोऽस्मि'...इति देशमातुरेकः पुत्रः।

❁ ❁ ❁